५

सोमाहुतिर्भार्गवः।अग्निः। अनुष्टुप्।

**होताजनिष्ट चेतनः पिता पितृभ्य ऊतये।**

**प्रयक्षञ्जेन्यं वसु शकेम वाजिनो यमम्॥ २.००५.०१**

होता- देवाह्वाता। चेतनः- चैतन्यधारामयः। पिता- पालकः। पितृभ्यः- अस्मद्गुरुभ्यः। ऊतये- रक्षायै। अजनिष्ट- आविर्भूतः। वाजिनः- शोभनगतिमन्तो वयम्। प्रयक्षम्- प्रकर्षेण पूज्यम्। जेन्यम्- जयशीलम्। यमम्- नियमाख्यम्। वसु- धनम्। शकेम- अग्निप्रसादेन प्राप्तुं शक्नुमः॥१॥

**आ यस्मिन्सप्त रश्मयस्तता यज्ञस्य नेतरि।**

**मनुष्वद्दैव्यमष्टमं पोता विश्वं तदिन्वति॥ २.००५.०२**

यस्मिन्। यज्ञस्य नेतरि सति। सप्त रश्मयः। आ तताः- विस्तृताः। पोता- शोधकः। मनुष्वत्- विवेकयुक्तम्। दैव्यम्- दिव्यम्। अष्टमम्- सप्तरश्मिविशिष्टमष्टमं सूर्यभूतम्। विश्वम्- विश्वरूपम्। तत्- तद्धाम। इन्वति- व्याप्नोति॥२॥

**दधन्वे वा यदीमनु वोचद्ब्रह्माणि वेरु तत्।**

**परि विश्वानि काव्या नेमिश्चक्रमिवाभवत्॥ २.००५.०३**

यत्- यदा। ईम्- एनम्। अनु- अनुसृत्य। दधन्वे- उपासको भावनां धारयति। ब्रह्माणि- मन्त्रान्। वोचत्- वदति। तत्- अग्न्यनुसन्धानम्। वेः- कामयते। तदा। अग्निः सर्वभूतहितक्रतुः। विश्वानि- सर्वाणि। काव्यानि- तस्य दर्शनानि। परि- परितो व्याप्नोति। नेमिः- बहिर्वेष्टनवलयः। चक्रम्- रथाङ्गम्। इव। अभवत्॥३॥

**साकं हि शुचिना शुचिः प्रशास्ता क्रतुनाजनि।**

**विद्वाँ अस्य व्रता ध्रुवा वया इवानु रोहते॥ २.००५.०४**

Dr. Ranganji

WEBOLIM

शुचिना- परिशुद्धेनोपासकेन। साकम्- सार्धम्। हि- खलु। शुचिः- परिशुद्धोग्निः। प्रशास्ता- धर्मशिक्षकः। क्रतुना- प्रज्ञया। अजनि- जातः। विद्वान्- ज्ञानी। अस्य- एतस्य। व्रता- धर्मा नियतयो वा। ध्रुवा- सनातनाः। वया इवानु रोहते- तरोः शाखा इव वर्धन्ते ॥४॥

**ता अस्य वर्णमायुवो नेष्टुः सचन्त धेनवः।**
**कुवित्तिसृभ्य आ वरं स्वसारो या इदं ययुः॥ २.००५.०५**

याः- ये। स्वसारः- स्वतः सरणशीलाः। इदम्- एतदुपासनम्। ययुः- सरन्ति। ताः- ते। आयुवः- व्याप्ताः। धेनवः- चिद्रश्मयः। नेष्टुः- नेतुरग्नेः। वरम्- श्रेष्ठम्। वर्णं- रूपम्। कुवित्- बहुधा। तिसृभ्यः- भूर्भुवःसुवराख्यभूमिकाभ्यः। आ- आभिमुख्येन। सचन्त- सङ्गच्छन्ति ॥५॥

**यदी मातुरुप स्वसा घृतं भरन्त्यस्थित।**
**तासामध्वर्युरागतौ यवो वृष्टीव मोदते॥ २.००५.०६**

यदि- यदा। स्वसा- तनया। मातुः- मातृवत्। उप- अग्न्यन्तिके। घृतम्- पूतनवनीतं पूतचित्तं वा। भरन्ती अस्थित- भरति। तासाम्- तदा तासां तनयानाम्। आगतौ- तस्मिन्नेव यज्ञकरणसम्प्रदाये प्राप्ते। यवः- धान्यम्। वृष्टीव- वृष्ट्या इव। अध्वर्युः- ध्वररहितकर्मक्रतुरग्निः। मोदते- तुष्यति। सनातने धर्मे सन्तत्या अभिनिवेशेनाग्निस्तुष्यतीति भावः ॥६॥

**स्वः स्वाय धायसे कृणुतामृत्विगृत्विजम्।**
**स्तोमं यज्ञं चादरं वनेमा ररिमा वयम्॥ २.००५.०७**

स्वः स्वाय धायसे- आत्मनैवात्मधारणाय। ऋत्विक्- ऋत्विक्भूतोग्निः। ऋत्विजम्- आर्त्विज्यम्। कृणुताम्- करोतु। आत्- अनन्तरम्। वयम्। अरम्- तृप्तिमयम्। स्तोमम्- मन्त्रमयम्। यज्ञम्। वनेम- सम्भजेम। ररिम- हविर्दद्मः ॥७॥

**यथा विद्वाँ अरं करद्विश्वेभ्यो यजतेभ्यः।**

Dr. Rangaji

WEBOLIM

**अ॒यम॑ग्ने॒ त्वे अपि॒ यं य॒ज्ञं च॑कृ॒मा व॒यम्॥ २.००५.०८**

अग्ने- पावक सर्वभूतहितक्रतो। यथा। विद्वान्- विद्यावान्। विश्वेभ्यः- सर्वेभ्यः। यजतेभ्यः- पूज्येभ्यो देवेभ्यः। अरंकरत्- हव्यं समर्पयति। तथा। यम्। यज्ञम्। वयम्। चकृम- कुर्मः। अयम्- स यज्ञः। त्वे- त्वयि। अपि- एव भवतु॥८॥

Dr. Ranganji

WEBOLIM